# bagalAmukhIkavacham

# बगलामुखीकवचम्

## Document Information

Text title : bagalAmukhIkavacham 1

File name : bagalAmukhIkavacham.itx

Category : kavacha, devii, dashamahAvidyA, devI

Location : doc_devii

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Latest update : March 20, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# बगलामुखीकवचम्

॥ अथ बगलामुखीकवचम् ॥

श्रुत्वा च बगलापूजां स्तोत्रं चापि महेश्वर ।
इदानीं श्रोतुमिच्छामि कवचं वद मे प्रभो ॥

वैरिनाशकरं दिव्यं सर्वाशुभविनाशनम् ।
शुभदं स्मरणात्पुण्यं त्राहि मां दुःखनाशनम् ॥

श्रीभैरव उवाच ॥

कवचं शृणु वक्ष्यामि भैरवी प्राणवल्लभे ॥

पठित्वा धारयित्वा तु त्रैलौक्ये विजयी भवेत् ॥

ॐ अस्य श्रीबगलामुखीकवचस्य नारदऋषिरनुष्टुप्छन्दः
श्रीबगलामुखी देवता लं बीजं ऐं कीलकं
पुरुषार्थचतुष्टये जपे विनियोगः ॥

शिरो मे बगला पातु हृदयैकाक्षरी परा ।
ॐ ह्रीं ॐ मे ललाटे च बगला वैरिनाशिनी ॥

गदाहस्ता सदा पातु मुखं मे मोक्षदायिनी ।
वैरिजिह्वान्धरा पातु कण्ठं मे बगलामुखी ॥

उदरं नाभिदेशं च पातु नित्यं परात्परा ।
परात्परपरा पातु मम गुह्यं सुरेश्वरी ॥

हस्तौ चैव तथा पातु पार्वतीपरिपातु मे ।
विवादे विषमे घोरे सङ्ग्रामे रिपुसङ्कटे ॥

पीताम्बरधरा पातु सर्वाङ्गं शिवनर्तकी ।
श्रीविद्यासमयो पातु मातङ्गीदुरिताशिवा ॥

पातुपुत्रं सुतां चैव कलत्रं कालिका मम ।
पातु नित्यं भ्रातरं मे पितरं शूलिनी सदा ॥

सन्देहि बगलादेव्याः कवचं मन्मुखोदितम् ।
नैव देयममुख्याय सर्वसिद्धिप्रदायकम् ॥

पठनाद्धारणादस्य पूजनाद्वाञ्छितं लभेत् ।
इदं कवचमज्ञात्वा यो जपेद् बगलामुखीम् ॥

पिबन्ति शोणितं तस्य योगिन्यः प्राप्यसादराः ।
वश्ये चाकर्षणे चैव मारणे मोहने तथा ॥

महाभये विपत्तौ च पठेद्वापाठयेत्तु यः ।
तस्य सर्वार्थसिद्धिः स्याद्भक्तियुक्तस्य पार्वती ॥

इति श्रीरुद्रयामले बगलामुखीकवचं सम्पूर्णम् ॥

Proofread by Nat Natarajan, NA

*bagalAmukhIkavacham*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*